श्रीशान्तादुर्गा महामाये कैवल्यपुरवासिने ।
नमो भर्गेमहाकाली महिषासुरमर्दिने ॥ १॥

नमो गौरी जगन्माते रत्नमालाविभूषिते ।
नमो भवानि रुद्राणि विश्वरूपे सुकंधरे ॥ २॥

नमस्ते भगवान्माये जगद्रक्षणकारिणे ।
नमोऽस्तु पतितोद्धारे नानारूपधरे नमः ॥ ३॥

नमो दाक्षायणी देवी भक्तारिष्टनिवारके ।
नमस्ते गिरिजे हेमी शिवरूपे महेश्वरी ॥ ४॥

नमः कात्यायनी आर्ये अपर्णे सस्मितानने ।
नमः खड्गधरे माये दशाष्टकरधारिणे ॥ ५॥

षड्गुणैश्वर्यसम्पन्ने नमः सुन्दररूपिणे ।
नवयौवनसंयुक्ते शाम्भवी शङ्करप्रिये ॥ ६॥

गणनाथाम्बिके भर्गे कार्तविर्योद्भवे शिवे ।
कामारिइश-अर्धांगे भवरोगादिनाशिने ॥ ७॥

नमः कौमार्यसम्पन्ने नीलकण्ठप्रिये नमः ।
निशाचरकुलध्वंसे भक्तकल्पलते नमः ॥ ८॥

अर्कपुष्पप्रिये चण्डि ललितादेविरूपिणे ।
सहस्रशिरसे गौरी मोहिनी सुरपालके ॥ ९॥

अहिंसाप्रियसंशुद्धे हिंसाकर्मनिवारके ।
वेदरूपिणी शास्त्राङ्गे शाक्तपाखाण्डदण्डके ॥ १०॥

चद्रानने चारुगात्रे सिंहासनसुशोभिते ।
भद्रकाली विरूपाक्षे पातालपुरवासिने ॥ ११॥

नमो दिव्ये महादेवी वाग्वरदे विलासिनी ।
विश्वात्मके विश्ववन्द्ये नानाभरणभूषिते ॥ १२॥

जगदम्ब जगदम्ब गौडकुलप्रपालके ।
सारस्वतेऽस्मि त्वत्पुत्र नमामि पदपकञ्जे ॥ १३॥

क्षमस्व अपराधोऽस्मि हीनदीनोऽस्मि अम्बिके ।
महामूढ महापापी महदज्ञानि पामर ॥ १४॥

अतिक्रोधि सुदुष्टोऽस्मि महाचाण्डाळ पातकी ।
अघोररूपी कामोऽस्मि क्षमस्व जगदम्बिके ॥ १५॥

श्रीशान्तादुर्गाचरणार्पणमस्तु ।

इति श्रीशान्तादुर्गादेविप्रणतिस्तोत्रं सम्पूर्णम् ।